# সদাশিবাষ্টকম্

{॥ সদাশিবাষ্টকম্ ॥}

পতঞ্জলিরুবাচ -

সুবর্ণপদ্মিনী-তটান্ত-দিব্যহর্ম্য-বাসিনে

সুপর্ণবাহন-প্রিযায সূর্যকোটি-তেজসে ।

অপর্ণযা বিহারিণে ফণাধরেন্দ্র-ধারিণে

সদা নমশ্শিবায তে সদাশিবায শংভবে ॥ ১॥

সতুঙ্গ ভঙ্গ জহ্নুজা সুধাংশু খণ্ড মৌळযে

পতঙ্গপঙ্কজাসুহৃৎকৃপীটযোনিচক্ষুষে ।

ভুজঙ্গরাজ-মণ্ডলায পুণ্যশালি-বন্ধবে

সদা নমশ্শিবায তে সদাশিবায শংভবে ॥ ২॥

চতুর্মুখাননারবিন্দ-বেদগীত-ভূতযে

চতুর্ভুজানুজা-শরীর-শোভমান-মূর্তযে ।

চতুর্বিধার্থ-দান-শৌণ্ড তাণ্ডব-স্বরূপিণে

সদা নমশ্শিবায তে সদাশিবায শংভবে ॥ ৩॥

শরন্নিশাকর প্রকাশ মন্দহাস মঞ্জুলা

ধরপ্রবাळ ভাসমান বক্ত্রমণ্ডল শ্রিযে ।

করস্পুরৎকপালমুক্তরক্ত-বিষ্ণুপালিনে

সদা নমশ্শিবায তে সদাশিবায শংভবে ॥ ৪॥

সহস্র পুণ্ডরীক পূজনৈক শূন্যদর্শনাত্-
সহস্রনেত্র কল্পিতার্চনাচ্যুতায ভক্তিতঃ ।
সহস্রভানুমণ্ডল-প্রকাশ-চক্রদাযিনে
সদা নমশ্শিবায তে সদাশিবায শংভবে ॥ ৫॥

রসারথায রম্যপত্র ভৃদ্রথাঙ্গপাণযে
রসাধরেন্দ্র চাপশিঞ্জিনীকৃতানিলাশিনে ।
স্বসারথী-কৃতাজনুন্নবেদরূপবাজিনে
সদা নমশ্শিবায তে সদাশিবায শংভবে ॥ ৬॥

অতি প্রগল্ভ বীরভদ্র-সিংহনাদ গর্জিত
শ্রুতিপ্রভীত দক্ষযাগ ভোগিনাক সদ্মনাম্ ।
গতিপ্রদায গর্জিতাখিল-প্রপঞ্চসাক্ষিণে
সদা নমশ্শিবায তে সদাশিবায শংভবে ॥ ৭॥

মৃকণ্ডুসূনু রক্ষণাবধূতদণ্ড-পাণযে
সুগন্ধমণ্ডল স্ফুরৎপ্রভাজিতামৃতাংশবে ।
অখণ্ডভোগ-সম্পদর্থলোক-ভাবিতাত্মনে
সদা নমশ্শিবায তে সদাশিবায শংভবে ॥ ৮॥

মধুরিপু-বিধি শক্র মুখ্য-দেবৈরপি নিযমার্চিত-পাদপঙ্কজায ।

কনকগিরি-শরাসনায তুভ্যং রজত সভাপতযে নমশ্শিবায ॥ ৯॥

হালাস্যনাথায মহেশ্বরায হালাহলালংকৃত কন্ধরায ।

মীনেক্ষণাযাঃ পতযে শিবায নমো-নমস্সুন্দর-তাণ্ডবায ॥ ১০॥

॥ ইতি শ্রী হালাস্যমাহাত্ম্যে পতঞ্জলিকৃতমিদং সদাশিবাষ্টকম্ ॥

Encoded and proofread by

N. Balasubramanian bbalu at satyam.net.in

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Sadashiva Ashtakam Lyrics in Bengali PDF
% File name : sadashiva8.itx
% Category : aShTaka
% Location : doc_shiva
% Author : patanjalikRitam sadAshivAShTakam
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : N.Balasubramanian bbalu at satyam.net.in
% Proofread by : N.Balasubramanian bbalu at satyam.net.in
% Description-comments : halAsyamAhAtmye
% Latest update : July 2, 2008
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study

% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website